**तृणचर** पु० तृणेषु चरति चर--अच्। १गोमेदमणौ २तृणचारिमात्रे त्रि०।

**तृणजम्भन्** त्रि० तृणं जम्भो भक्ष्यमस्य तृणमिव जम्भोदन्तोऽस्य "जम्भा सुहरित तृणसोमेभ्यः" पा० कृतसमासान्तः नि०। तृणभक्षके तृणतुल्यदन्तयुक्ते च। शब्दकल्पद्रुमे अदन्तोक्तिः प्रामादिकी पा० सू० नान्ततयैव निपातनात्।

**तृणजलायूका** स्त्री० तृणाकारा तृणजाता वा जलायूका जलौकाभेदे। "तद्यथा तृणजलायूका तृणस्यान्तं गत्वात्मानमुपसंहरत्येवमेवायं पुरुष इदं शरीरं निहत्याविद्यां गमयित्वात्मानमुपसंहरति" शत० ब्रा० १४।७२।४। तृणजलूकादयोऽप्यत्र स्त्री "यथा तृणजलूकेयं नापयात्यपयाति च" भाग० ४।२९।७६।

**तृणजलौकान्याय** तृणजलौकायाः यथा अपरदेशसंयोगानन्तरं पूर्वदेशवियोगस्तत्तुल्ये जीवस्यापरदेहसंयोगेन पूर्वदेहपरित्यागरूपे न्याये। स च नैयायिकानां तृणजलयूकाशब्दे दर्शितश्रुत्या कल्पितः। तदेतन्मतं शा०भा० आशङ्क्य तन्मूलश्रुतेरन्यार्थत्वं प्रदर्श्य दूषयित्वा छा० उ० पञ्चाग्निविद्युक्तौश्रुतेः अन्यविध एव संसरणप्रकार उक्तः। यथा "नन्वन्या श्रुतिः तृणजलौकावत् पूर्वदेहं न मुञ्चति यावन्न देहान्तरमाक्रमतीति दर्शयति। इति। तद्यथा तृणजलायूकेति, (तृणजलायूकाशब्दे दर्शिता) तत्राप्यपरिवेष्टितस्यैव जीवस्य कर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रं तृणजलूकयोपमीयत इत्यविरोधः। एवं श्रुत्युक्ते देहान्तरप्रतिपत्तिप्रकारे सति याः पुरुषमतिप्रभवाः कल्पनाः" इत्युपक्रमे 'ताः सर्वा एवानादर्तव्याः श्रुतिविरोधात्"। "नन्वेतद्देहं त्यक्त्वाऽङ्गिः सहगतस्य पश्चाद्देहान्तरप्राप्तिरित्ययुक्तम्। यथा तृणजलायूका तृणान्तरं गृहीत्वा पूर्वतृणं त्यजति तथा जीवो देहान्तरं गृहीत्वा पूर्वदेहं त्यजतीति श्रुतिविरोधादिति शङ्कते नन्वेति। इहैव कर्मायत्तभाविदेहे देवोऽहमित्यादिभावनया गृहीत्वा पूर्वदेहं त्यजतीति श्रुत्यर्थः। अतो न विरोधः, इति समाधत्ते, तत्रापीति भावनाया दीर्घभावो भाविदेहविषयत्वम्। घटाकाशवदुपहितो जीवः सूक्ष्मोपाधिगत्या लोकान्तरं गच्छतीति पञ्चाग्निश्रुत्युक्तः प्रकारस्तद्विरोधादन्याः कल्पनाः अनादर्तव्या इत्यन्वयः" रत्नप्र०।

**तृणजाति** स्त्री तृणमेव जातिः। उलपादौ (खड़)।

**तृणज्योतिस्** न० तृणेषु मध्ये ज्योतिः ज्योतिष्मतः। रात्रौ प्रकाशवत्यां ज्योतिष्मत्यां लतायाम् शब्दार्थचि०।

**तृणता** स्त्री तृणमिव तायते ताय--क्विप्। १धनुषि तृणस्य भावः तल्। २तृणत्वे च मेदि०।

**तृणद्रुम** पु०तृणमिव द्रुमः असारत्वात्। १नारिकेले, २ताले, ३गुवाके, ४ताल्यां, ५केतक्यां, ६खर्जूरे, ७हिन्ताले, ८खर्जूर्य्यां च। "फलसुद्रगमेते च हिन्तालसहितास्त्रयः (तालनारिकेलगुवाकाः)खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः"अमरः।

**तृणधान्य** न० तृणमिव धान्यं अकृष्टोत्पन्नत्वात् शाक० त०। १नीवारे, अमरः २श्यामाकादौ च।

**तृणध्वज** पु०तृणेषु ध्वज इव।१तालवृक्षे २वंशवृक्षे च अमरः

**तृणनिम्ब** पु० तृणाकारः निम्बः। नेपालनिम्बे किराततिक्ते (चिराता) राजनि०।

**तृणप** पु० तृणं पाति -पा क। गन्धर्वभेदे। "युगपस्तृणपः कार्ष्णिर्नन्दिश्चित्ररथस्तथा"भा०आ०१२३अ०। गन्धर्वोक्तौ।

**तृणपञ्चमूल** न० तृणरूपाणां पञ्चानां मूलम्। कशेरुशररादर्भाणककर्कटकात्मके पञ्चमूले वैद्यकम्। [राजनि०।

**तृणपत्रिका** स्त्री तृणस्येव पत्रमस्त्यस्याः ठन्। इक्षुदर्भायां

**तृणपत्री** स्त्री तृणमिव पत्रमस्याः गौरा० ङीष्। गुण्डाशिन्यां राजनि०।

**तृणपदी** स्त्री तृणस्येव पादोऽस्याः अन्त्यलोपः कुम्भप० ङीपि पद्भावः। तृणतुल्यमूलयुक्तायां लतायाम्।

**तृणपीड** न० तृणस्येव पीड़ा यत्र। युद्धभेदे "तृणपीड़ं यथाकामं पूर्णयोगं ससृष्टिकम्। एवमादीनि युद्धानि प्रकुर्वन्तौ परस्परम्" भा० स० २३अ०।

**तृणपुष्प** न० तृणजातं पुष्पम्। तृणकुङ्कुमे १गन्धद्रव्यभेदे राजनि०। तृणमिव पुष्पमस्याः ङीप्। २सिन्दूरपुष्पीवृक्षे स्त्री राजनि०। [स्वार्थे क। तृणपुलिकाऽप्यत्र स्त्री मेदि०।

**तृणपुली** स्त्री तृणनिर्मिता पुली। चञ्चायां (चाँच) हारा०

**तृणमणि** पु० तृणग्राहको मणिः शा० त०। तृणग्राहिणि मणिभेदे हारा०।

**तृणमत्कुण** पु० प्रतिभुवि (जामिन्) त्रिका०।

**तृणमय** त्रि० तृणस्य विकारः शरा० मयट्। तृणविकारे "कुर्य्यात् तृणमयं चापं शयीत मृगशायिकाम्" भा० आ० १४५ अ०। स्त्रियां ङीप्। [तालवृक्षे अमरः।

**तृणराज** पु० तृणेषु राजते राज--अच् ६त० टच् समा०वा।

**तृणवल्वजा** स्त्री तृणरूपा वल्वजा। वल्वजायां राजनि०।

**तृणविन्दु** ऋषिभेदे "जयद्रथेन पापेन यत् कृष्णा क्लेशिता